# उपमानप्रमाणविवेचनम्

तुलसीपौडेलः *

**सारः**

*प्राच्यदर्शनेषु प्रमाणनिरूपणं सर्वैरपि यथामतं विधीयते । प्रमाणविवेचनपूर्वकमेव दर्शनशास्त्रस्यावबोधो भवति । एवंञ्च प्रमाणविभागोऽपि दर्शनदृष्ट्यनुसारेण विहितो दृश्यते । प्रमाणसंख्यायामपि नास्त्यैकत्वमिति । बौद्धाःतत्र प्रत्यक्षानुमानमेव स्वीकुर्वन्ति । वैशेषिकाऽपि प्रमाणद्वयमेव स्वीकुर्वन्ति । एवं क्रमेण प्रमाणसंख्यायामपि भेदोऽपलभ्यते । न्यायमते प्रत्यक्षानुमानोपमानशब्दा इति चत्वरि प्रमाणानि स्वीक्रियन्ते । तत्रोपमानप्रमाणं मीमांसावेदान्तादिष्वपि गृह्यते । उपमानप्रमाणनिरूपणञ्च न्यायदर्शनादन्यथा एव मीमांसादिषु विहितं वर्तते । तस्य उपमानस्य विषये अत्र संक्षिप्तमात्रेण अत्र मया प्रदर्शितमस्ति ।*

**शब्दकुञ्जी -** दर्शनशास्त्रम्, उपमानम्, अनुमानम्, संज्ञासंज्ञिज्ञानम्, गोसदृशः, साधर्म्यम्, वैधर्म्यम् ।

## १. विषयपरिचयः

न्यायदर्शने स्वीकृतेषु प्रमाणेषु उपमानं तृतीयप्रमाणं वर्तते । सर्वैरपि नैयायिकैः प्रत्यक्षानुमानोपमानशब्दा इति प्रमाणचतुष्टयमङ्गीकृतं विद्यते । तत्र न्यायशास्त्रज्ञ अथ च न्यायसारप्रणेता भासर्वज्ञमुनिरेव प्रमाणचतुष्टयं नाङ्गीकरोति । अन्ये च सर्वेपि नैयायिकाः प्रमाणचुष्टयं स्वीकुर्वन्ति एव । संज्ञासज्ञिसंबन्धज्ञानमुपमितिः । तस्य करणमुपमानमस्ति । । संज्ञासंज्ञिसंबन्धज्ञानञ्च सादृश्यमूलकं भवति यथा - गोगवयो इति । एवञ्च तत्र तर्कभाषाकारः कथयति यत् अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमुपमानम् । (तर्कभाषा उपमाननिरूपणम्)

## २.समस्याकथनम्

दर्शनशास्त्रे प्रामाणविषये सर्वैरपि क्लिष्टा गहना च चर्चा विहिता दृश्यते । यदोपलभ्यते तदतीव क्लीष्टभाषया शैल्या च प्रतिपादितं दृश्यते । तत्रापि उपमानप्रमाणविषये तावान् उल्लेखो नोपलभ्यते । तदर्थमुपमानस्य विवेचनमत्यन्तावाश्यकमभूदिति । अतः ग्रन्थग्रन्थान्तरेष्वनुस्यूतं उपमानप्रामाणविषयं सप्रमाणं विस्तारणे दृष्टा कठिनतैव शोधसमस्या वर्तते । समुपस्थितस्य काठिन्यस्य निराकरणमेवास्योद्देश्यम् वर्तते । तत्र जिज्ञासूनामुपमानसम्बद्धविषयस्य सारल्येन ज्ञानायातीव कष्टं भवतीति मन्ये । अधुना इयमेव मुख्या समस्या मया दृष्टा । ताः मुख्यत्वेनाधो निर्दिश्यन्ते –

क. किं नाम उपमानप्रमाणम् ?

ख. उपामानप्रमाणेन उमिमितिज्ञानं कथमुत्पद्यते ?

ग. न्यायमीमांसादिप्रतिपादितोपमानप्रमाणे भेदः कः ?

---

* *उपप्राध्यापकः ने.सं.वि.पिण्डेश्वरविद्यापीठम्, धरानः ।*

## ३.उद्देश्यम्

ग्रन्थग्रन्थान्तरेष्वनुस्यूतमुपमानप्रमाणस्य सप्रमाणं विस्तारणे समुपस्थितस्य काठिन्यस्य निराकरणमेवास्योद्देश्यम् वर्तते । तस्मादत्र यथाग्रन्थं सरलतया उपामानस्य वर्णनम् तथा तस्मिन् विषये सम्बद्धदर्शनग्रन्थेषूपस्थापितानां मतमतान्तराणां विवेचनमपि विधीयते । उपरि समस्याकथनकाले स्थापितानां समस्यानां समाधानमेवास्य मुख्योद्देश्यं वर्तते । तासां समास्यानां समाधानञ्चात्र क्रियते । न्यायवैशिषकदर्शनसम्बद्धस्य तथा च मीमांसादिदर्शने प्रतिपादितोपमानप्रमाणस्य सारल्येन प्रतिपादनमेवास्य शोधलेखस्य मुख्यमुद्देश्यं विद्यते । अत्रोद्देश्यानुसारेणैव विषयस्य वितार्ण विवेचनञ्च क्रियते । विषयक्रमेणोपस्थितानि शोधलेखस्योद्देश्यानि चाधः प्रस्तुतानि सन्ति -

क) उपमानप्रमाणस्य परिचयपूर्वकं विवेचनम्

ख) उपमानप्रमाणेन उमिमितिज्ञानस्योपत्तिविषयस्य प्रदर्शनम्

ग) न्यायमीमांसादिप्रतिपादितोपमानप्रमाणस्य भेदः प्रदर्शनम्

## ४ शोधविधिः

उमपमानप्रमाणनिरूपणार्थं विविधसामग्रीप्राप्त्यर्थं पुस्तकालयीयाध्ययनविधिरेव प्रामुख्यमर्हति । पूर्वीयदर्शनसम्बन्धिताः विविधाः ग्रन्थाः, संस्कृतमूलाकारग्रन्थाः, प्राथमिकसामग्रीत्वेनात्र गृह्यन्ते । तस्मादतिरिक्तं नैकविधपूर्वीयदर्शनानुसन्धातृभिः कृतशोधग्रन्थानामप्यवलोकनमत्र विधीयते । विषयवस्तुनो विश्लेषणायात्र विश्लेषणात्मको विधिः तथा वर्णनात्मको विधिरवलम्व्यते ।

## ५.उपमानप्रमाणनिरूपणम्

प्रायः पूर्वीयदर्शने उपमानप्रमाणस्य विवेचनातीवाल्पत्वेन विहिता वर्तते । तत्र प्रथममुपमानशब्दस्य निष्पत्तिप्रक्रिया इयमस्ति यत् उप उपसर्गपूर्वकम् माङ् माने इत्यस्माद्धातोः करणाधिकरणयोश्च इत्यनेन सूत्रेण उपमितिसाधनार्थे करणे ल्युट्प्रत्यये च जाते उपमानमिति शब्दस्य निष्पत्ति भवति । अथवा उपमितिरूपमानमित्यत्र भावे **ल्युट् च** इत्यनेन सूत्रेण ल्युटा उपमितिरूपज्ञानार्थके उपमानमिति शब्दनिष्पत्तिः भवति ।

तत्र प्राचीनन्यायानुसारेणोपमानस्य स्वरूपमिदानीं प्रदर्श्यते । न्यायसूत्रकर्ता गौतमो वदति यत् उपमानप्रमाणस्य विषये प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् । अस्य सूत्रस्य विवरणं न्यायभाष्यकारेण दत्तमस्ति यत् प्रज्ञातविषयस्य सादृश्यबलेन ज्ञापनीयस्य विषयस्य ज्ञानमुपमानम् । उपमानप्रमाणस्य प्रयोजनं तु सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतीतिश्च वर्तत । अत्रोदाहारणञ्च यथा- 'गौरिव गवयः इति श्रुत्वाऽरण्यगतेन पुरुषेण अरण्ये कस्मिंश्चित् पशौ गोविद्यमानधर्मानवलोक्य 'अयमेव गवय इत्यवधारणमुपमानम् । अयमेव चोमानप्रमाणस्योदाहारणमिति ।

न्यायदर्शनस्य संस्थापकाचार्येण गौतमेन उपमानलक्षणमिदमुक्तं न्यायसूत्रग्रन्थे प्रसिद्धसाधर्म्यात् साध्यसाधनम् उपमानम् । (न्यायर्शन.१-१-६) इति । प्रज्ञातस्य वस्तुनः साधर्म्यात् प्रज्ञापनीयस्य वस्तुनः प्रज्ञापनम् उपमानमस्ति । तत्रोदाहरणपूर्वकं प्रदर्श्यते यत् - गौः+एवं गवयः इति । गोसदृशो गवयो भवतीति इति ज्ञानवान् यः कोऽपि सज्जनः अरण्ये कश्चित् पिण्डः यदा

गोसदृशं पश्यति तदा अतिदेशवाक्यार्थस्मरणेन पुरः दृश्यमानो पदार्थः अयं गवय इति संज्ञासंज्ञिसम्बन्धज्ञानमुपजायते, तदेव उपमानमिति । गवय इति समाख्याशब्दस्य गवयपदार्थस्य च सम्बन्धस्य बोधनमुपमानप्रमाणस्य च प्रयोजनमिति सिध्यति । प्रसिद्धम् साधर्म्यम् यस्य, प्रसिद्धेन वा साधर्म्य यस्य इति प्रसिद्धसाधर्म्य गवयः इति वार्तिककारस्य मतम् । परन्तु भाष्यकारेण तथा नोक्तम् । अतः भाष्यकारविरुद्धमतमिदम् । शब्दप्रमाणाहितसंस्कारजन्यस्मृत्यधीनम् सारूप्यज्ञानम् एव उपमानम् (न्या.वा. ३५६) । तात्पर्यटीकाकारस्य मते प्रसिद्धसाधर्म्यात् इत्यत्र प्रसिद्धिरित्यस्यापि द्विविधो भेदः प्रदर्शितो वर्तते । श्रुतिमयभेदः प्रथमो भेदः । अन्यश्च प्रत्यक्षमयो भेदः । पुनश्च अत्र निरूपणीयं भवति यत् प्रसिद्धसाधर्म्यात् इत्यत्र प्रसिद्धिरुभयी श्रुतमयी, प्रत्यक्षमयी चेति पूर्वमुक्तमेव । श्रुतमयीभेदस्य निरूपणं ग्रन्थकारेण एवंरीत्या विहितमस्ति - गौः एवं गवयः इति । प्रत्यक्षमयी च यथा - गोसादृश्यविशिष्टः अयम् पिण्डः इति । (न्या.वा.३५७)

न्यायमञ्जरीकारजयन्तो भट्टः कथयति यत्- श्रुतातिदेशवाक्यस्य प्रमातुः अप्रसिद्धे पिण्डे प्रसिद्धपिण्डसारूप्यज्ञानमिन्द्रियजं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलम् उपमानम् (न्यायमञ्जरी .पृ. १२९) । उदयनाचार्येणाऽपि उपमानविषये सुबहु विचार्य तस्य निरूपणं स्वकीयेषु ग्रन्थेषु किरणावल्यादिषु च सुष्ठु कृतमिति ।

नव्यन्यायमते मते च उपमितिकरणत्वमुपमानस्य लक्षणमुक्तमस्ति । तथा हि - आरण्यकपुरुषेण ग्रामस्थान् जनान् प्रति 'गोसदृशः गवयपदवाच्यः' इति गवयमृगः अभिवर्णितः । ततः परम्, यदा अरण्ये गवयः तेन दृष्टः तदा गौसादृश्यज्ञानं यत् जायते तदुपपमानम् गोसदृशो गवयः' इति अतिदेशवाक्यार्थस्मरणं व्यापारः, ततः जायमानं गवयः 'गवयपदस्य वाच्यः इति यज्ज्ञानं तदुपमितिः फलम् । प्राचीनैर्नैयायिकैः तस्य कृते संज्ञासंज्ञिसम्बन्धज्ञानमुक्तमिति । अयं गवयपदवाच्यः कदापि उपमिति भवितु न शक्नोतीति । गवयान्तरे शक्तिग्रहाभावादिति । तत्र विश्वनाथेन मुक्तावलिग्रन्थे स्पष्टतया निरूपितो दृश्यते । (मुक्तावली पृ.२९-३०)

तथा च भाष्यम् – प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति । यथा गौरेवं गवय इति । किं पुनरत्र उपमानेन क्रियते ? यदा खल्वयं गवा समानधर्मं प्रतिपद्यते तदा प्रत्यक्षतः तमर्थं प्रतिपद्यत इति, समाख्यासम्बन्धप्रतिपत्तिरूपमानार्थ इत्याह । यथा गौरेवं गवय

इत्युपमाने प्रयुक्ते गवा समानधर्ममर्थमिन्द्रियार्थ-सन्निकर्षाद् उपलभमानोऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति । यथा मुद्गः तथा मुद्गपर्णी, यथा माषः तथा माषपर्णी इत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानः तामोषधीं भैषज्यायाहरति । (न्यायभाष्यम् अ.१,आ १. ६)

उपमानस्य प्रमाणस्य विषये कमोऽयं वर्तते यत् पूर्वं गवयपदार्थमजानानः कश्चित् जिज्ञासुनरः कस्यचिन्मुखाद् गवयशब्दं श्रृणोति तदनन्तरं च अस्य मनसि एतस्य शब्दस्य कोऽर्थः ? इति जिज्ञासा भवति । अरण्यगतश्च स तत्र आरण्यकेन पुरुषेण **गौरिव गवयः** इत्युपदिष्टो भवति । ततश्च वनं गत्वा तत्र गोसदृशं कञ्चित् पशुविशेषं दृष्ट्वा 'गौरिव गवयः इति पूर्वश्रुतं वाक्यमनुस्मृत्य **अयमेव गवयः** इति निर्धारयति । इदं पदपदार्थनिर्धारणात्मकमेवोपमितिः प्रमा इति ।

उपमानप्रमाणस्य प्रवृत्तिः कथं भवति इत्यत्र उच्यते अधुना न्यायदर्शने गोसादृश्य-विशिष्टपिण्डदर्शनं यत्कारणं तदेवोपमानं प्रमाणम् । 'गौरिव गवयः इत्यतिदेशवाक्यार्थस्मरणं च तत्रावान्तरव्यापारः । अत्र गोसादृश्यविशिष्टपिण्डः संज्ञी, गवयः इति च तस्य सञ्ज्ञा, तयोः संज्ञासंज्ञिसम्बन्धप्रतीतिः (गवयो गवयपदवाच्यः) इति उपमितिः प्रमा । भाष्यस्य व्याख्यानावसरे भारद्वाजोद्योतकरेण स्वग्रन्थन्यायवार्त्तिके उपमाननिरूपणमित्थं कृतम् - प्रसिद्धसाधर्म्यादिति - प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा साधर्म्यं यस्य, सोऽयं प्रसिद्धसाधर्म्यो गवयः, तस्मात् साध्यसाधनमिति । समाख्यासम्बन्धप्रतिपत्तिरूपमानार्थः । किमुक्तं भवति ? आगमाहित-संस्कारस्मृत्यपेक्षं सारूप्यज्ञानमुपमानम् । यदा हि अनेन श्रुतं भवति यथा गौरेवं गवय इति, प्रसिद्धे गोगवयसाधर्म्ये पुनर्गवयसाधर्म्यं पश्यति प्रत्यक्षम् । ततस्तस्य भवत्ययं गवय इति समाख्यासम्बन्धप्रतिपत्तिः ।

अत्र वार्त्तिककारेण सूत्रस्य तात्पर्यं सम्यक् निरूपितं विद्यते । तै सूत्रस्य तात्पर्यं प्रतिपाद्यते यत् - समानासमानजातीयव्यवच्छेद इत्यर्थः । साध्यसाधनमित्युच्यमाने प्रत्यक्षादिसाधने सुखादिसाधने घटे प्रसङ्गः । अत उक्तं प्रसिद्धसाधर्म्यादिति । यद्यपि प्रसिद्धसाधर्म्यमुपमानमित्युच्यमाने प्रमाण-विशेषाभिधाच्युपमानपदसामानाधिकरण्यात् कारकत्वलाभः तथापि तदाभासनिराकरणाय साध्यसाधनपदोपादानम्, तेनोपमानाभासोऽपाकृतो भवति । वार्त्तिककारेण बहुव्रीहिद्वयसंबन्धो दर्शितः, न तु तृतीयासमासो भाष्यकारेण यो निरस्तः । भाष्यकारेण हि संज्ञितया गवयप्रतिपत्तिः फलं साध्यसाधनपदवाच्यमुक्त्वा, आक्षिप्तप्रयोज्यव्यापारत्वात् । प्रयोजकव्यापारस्य प्रज्ञापनस्य पश्चान्निष्कृष्याभिधानं कृतम् - समाख्यासम्बन्धप्रतिपत्तिरूपमानार्थम् इति । एतदेव साध्यसाधनपदार्थतया श्रीमता उद्योतकरेण स्वकीये न्यायवार्तिके प्रतिपादितमस्ति यत् - समाख्या-सम्बन्धप्रतीतिरूपमानार्थः फलम् । साध्यपदेन समाख्यासम्बन्ध उच्यते तस्य साधनं सिद्धिः प्रतिपत्तिरिति । ननु प्रतिपद्यतामयं गोसादृश्यमुक्तं गवयम्, सामाख्यासम्बन्धप्रतिपत्तिस्तु कुतस्त्या ? न हि यो यत्सदृशं यं प्रतिपद्यते स तस्य समाख्यामपि अवगच्छति इति आशयवान् पृच्छति - किमुक्तं भवति ? उत्तरम् - आगमेति । आगमानुभवाहितात् संस्कारात् स्मृतिः । एतदुक्तं भवति - न केवलं सारूप्यज्ञानं समाख्यासम्बन्धप्रतिपत्तिहेतुः, अपि तु आगमार्थस्मृत्यपेक्षमिति । तत्र प्रत्यक्षमयी प्रसिद्धिरागमस्मृत्यपेक्षा समाख्यासम्बन्धप्रतिपत्तिहेतुः ।

यद्यपि यथा गौरेवं गवय इत्येतस्मादपि गोसदृशस्य गवयशब्दः समाख्येति शक्यमवगन्तुम्, न खलु प्रत्यक्ष एव संज्ञाकर्म समानजातीयव्यवच्छिन्ने हि तच्च यदि मानान्तरेणापि तथावगम्यते संज्ञाकर्म निवारयेत्, गोसादृश्येन चोपलक्षितः पिण्डो य इति सर्वनाम्ना परामृष्टः शक्यो घटादिभ्योऽसमानजातीयेभ्यो महिषादिभ्यश्च समानजातीयेभ्यो व्यवच्छिन्नोऽवगन्तुं गवयः, तथापि यावदयमसौ गवय इति साक्षात् प्रतीते सम्बन्धिनि संज्ञां न निवेशयति तावदयं परिप्लुतमतिः प्रमाता कश्चित् खलु द्रक्ष्यामि तादृशं पिण्डमत्र गवयसंज्ञां प्रतिपत्स्ये इति प्रमोत्सुक एवोदीक्षेत् । न चासौ वाक्यमात्रसहायोऽप्रत्यक्षीकृतगोसदृशगवयपिण्डमसौ गवयाख्य इति प्रतिपत्तुमर्हति, न च वाक्यं विना प्रत्यक्षमात्रात्, तस्मात् आगमप्रत्यक्षाभ्यामन्यदेवम् आगमस्मृतिसहितं सादृश्यज्ञानमुपमानाख्यं प्रमाणमास्थेयम् ।

**६. उपमानस्य भेदाः**

उपमानस्यापि भेदो वर्तते । उपमानजन्यज्ञानं उपमितिरस्ति । इयं चोपमिति सादृश्यज्ञानादेव न, तथा च वैधर्म्यज्ञानादपि जायते । तद्यथा - पृथिवी जलादिविरुद्धधर्मवती इति ज्ञाते गन्धरहित-पाषाणमुपलभ्यापि तम् अप्तेजोप्रभृतिद्रव्यधर्मशून्यं ज्ञात्वा इयं पृथिवी इति ज्ञानमुत्पद्यते । साधर्म्यवैधर्म्येऽतिरिच्यासाधारणधर्मज्ञानादपि सोत्पद्यते । यथा - पञ्चाङ्गुलिश्चतुष्पादो दीर्घनासः श्यामघनसुदीर्घकेशः मांसादो वन्यपशुर्भल्लूकः इति ज्ञानवान् पुरुषः कदाचिदरण्यं गतस्तत्रोपर्युक्तगुणसम्पन्नं वन्यपशुं दृष्ट्वा अयमेव स भल्लूक इति निश्चिनोति । उत्तरवर्तिभिः नैयायिकैः संज्ञासंज्ञिसम्बन्धप्रतीतिमुपमितिमभिधाय तत्करणमुपमानं त्रिधा विभज्य प्रतिपादितं वर्तते । यथा चाधः प्रदर्श्यते –

१. सादृश्यविशिष्टपिण्डदर्शनम्
२. वैधर्म्यविशिष्टपिण्डदर्शनम्
३. असाधारणधर्मविशिष्टपिण्डदर्शनं चेति । ( तर्कसंग्रहपदकृत्यम्,)

उपमितिविषयेऽवलोकितमस्माभिर्यत् संज्ञासंज्ञिसम्बन्धप्रमितिरूपामुपमितिं प्रति सादृश्यादिधर्म-विशिष्टपिण्डज्ञानं करणं भवति । न्यायसिद्धान्तमुक्तावल्यां आचार्येण विश्वनाथेन उममितिकरणविषये उक्तं दृश्यते यत् - 'सादृश्यज्ञानस्य स्थाने सादृश्यदर्शनमुपमितिकरणं मन्तव्यमिति । तस्य मते सादृश्यदर्शनं करणम्, अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारो भवति । गवयो गवयशब्दवाच्यः इति ज्ञानं च उपमितिः वर्तते' इति (न्याय-सिद्धान्तमुक्तावली, उपमानप्रकरणम्) । अस्याभिप्रायः अत्रोपवर्ण्यते यत् - पुरो दृश्यमानो गोसदृशोऽयं पशुपिण्डो गवयसञ्ज्ञ इति ज्ञानं नोपमितिः, किन्तु गवयो गवयपदवाच्य इति ज्ञानमुपमितिः, अन्यथा कालान्तरे गवयान्तरं पश्यतो गवयोऽयम् इति प्रतीतिर्न प्रत्यक्षम् स्यात्, किन्तु सर्वत्रोपमितिव्यवहारापत्तिरेव स्यात् । न च सर्वत्र गवयदर्शने सति अतिदेशवाक्यर्थस्मरणं सादृश्यज्ञानादि च भवति । अतश्च गवयोऽयं गवयपदवाच्य इति प्रतीतिरूपमितिः, न तु पुरो दृश्यमानोऽयं गवय इति प्रतीतिः ।

**७.उपमानस्य उदाहरणान्तराणि –**

उपमानप्रमाणसम्बद्धानि उदाहरणानि अन्यान्यपि दृश्यन्ते । लोकव्यवहारमादाय तथोदाहरणं प्रस्तुतमिति ज्ञायते । यथा - मुद्गस्तथा मुद्गपर्णी, यथा माषस्तथा माषपर्णी इत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानः तामोषधीं भैषज्याय आहरतीति । (न्यायभाष्यं उपमाननिरूपणम्)

भाष्यकारस्यायं भाव एवं भवितुमर्हति - कश्चन पुरुषः मुद्गपर्णी, माषपर्णी इति शब्दयोः वाच्यौ अर्थौ न जानाति, स कदाचन द्रव्यतत्त्वज्ञात् चिकित्सकात् श्रृणोति - मुद्गसदृशी भवति मुद्गपर्णी, एवं माषसदृशी भवति माषपर्णी इति अनेन श्रोत्रा मुद्गमाषपदार्थौ पूर्वमेव दृष्टौ प्रसिद्धौ स्तः । तदनन्तरं सः कदाचन पर्वतं गतः, सः मुद्गपर्णी माषपर्णीं च दृष्ट्वा चिकित्सकोक्तवाक्यं स्मरति - यथा मुद्गः तथा मुद्गपर्णी, यथा माषस्तथा माषपर्णीति । तदनन्तरं स यथाक्रमम् - ओषधिविशेषयोः मुद्गपर्णीमाषपर्णीशब्दयोश्च वाच्यवाचकभावरूपं सम्बन्धमवधारयति । मुद्गपर्णीशब्दस्य मुद्गपर्णीरूपेऽर्थे शक्तिज्ञानम्, माषपर्णीशब्दस्य माषपर्णीरूपेऽर्थे च

शक्तिज्ञानमेवोपमितिपदार्थः । तत्करणं मुद्गपर्णीरूपेऽर्थे, मुद्गसादृश्यज्ञानम्, माषपर्णीरूपेऽर्थे माषसादृश्यमुपमानाख्यं प्रमाणम् इति । लोके अन्येपि बहवः विषया उपमानप्रमाणसम्बद्धा भवितुमर्हतीति भाष्यकारेण वात्स्यायनेन तत्र निर्दिष्टमिति दृश्यते । इममेव विषयमादाय श्रीमन्तो वाचस्पतिमिश्राः कथयन्ति यत् - यथा प्रसिद्धपदार्थसादृश्यज्ञानेन उपमितिर्जायते, तथैव कुत्रचित् प्रसिद्धपदार्थवैधर्म्यप्रत्यक्षेणापि । इयमुपमितिः वैधर्म्योपमितिरुच्यते । (तात्पर्यटीका, उपमानखण्डः) वैधर्म्यवशात् कथं ज्ञानं भवतीति विषये अत्र दृष्टान्तमेकं प्रस्तूयते यथा - कश्चन उष्ट्राख्यं पशुं करभशब्दवाच्यमपि अस्तीति न जानाति, तमन्यः करभशब्दवाच्यमपि उष्ट्रमेवास्ति जानन् पुरुषः कथयति - करभः कुरूपः लम्बग्रीवः इत्यादिकम् । पश्चात् स करभशब्दवाच्यमजानन् पुरुषः कुत्रचित् उष्ट्रं दृष्ट्वा गवादिपशुवैधर्म्यं ज्ञात्वा पूर्वोक्तवाक्यं स्मरन् अयमुष्ट्रः करभशब्दवाच्य इति वाच्यवाचकभावं निर्णेति । एतादृशस्थले वाच्यवाचकभावरूपसम्बन्धनिर्णयः वैधर्म्योपमानमुच्यते । साधर्म्यवैधर्म्याभ्यामेव उपमानस्य निरूपणं भवतीति मन्तव्यम् ।

**८.मीमांसकोक्तोपमानस्वरूपविवेचनम् –**

मीमांसकाऽपि उपमानं प्रमाणान्तरं स्वीकुर्वन्ति । परन्तु प्रतिपादनञ्च न्यायदर्शनव्यतिरिक्तमेव कुर्वन्ति । अस्याभिप्रायः मीमांसकास्तावदुपमानप्रमाणं स्वतन्त्रमङ्गीकुर्वन्तोऽपि तस्य स्वरूपं न्यायादन्यथा वर्णयन्ति । एकोदाहारणमत्र प्रस्तूयते-यदा गवयपदार्थमजानन् कश्चिदारण्यकपुरुषं पृच्छति नागरकः । स चारण्यको गृहे वर्तमानं गां प्रदर्श्य एतत्सदृशो गवयः इति वदति । कालान्तरे अरण्यं गतो नागरकः यदा गवयं पश्यति तदा तत्सादृश्यं स्वगृहे वर्तमाने गवि स्मरति । तेन चायं गवयपदवाच्यः इति उपमितिर्जायतेऽतो गवि गवयसादृश्यज्ञानमेवोपमानाख्यप्रमाणमिति । तदस्योपमानस्य विषयस्तु सम्प्रति अवगम्यमानगवयसादृश्यविशिष्टः परोक्षो गौः, तद्वति गवयसादृश्यं वा । अत एव न तज्ज्ञानं प्रत्यक्षजन्यम्, परोक्षगोविषयत्वाद् । अश्रुतातिदेशशवाक्यस्याभावान्न शाब्दञ्च । अतः तस्माद् व्यतिरिक्तं प्रमाणं स्वीकर्तव्यमेव । अत्रापि उपमानस्य भाट्टमतं प्रभाकरमतञ्चादाय द्विविधं वर्णितमस्ति ।

**क. भाट्टसिद्धान्तः -**

भाष्यकारेण शबरस्वामिना उपमानलक्षणमेवं प्रतिपादितं वर्तते यथा - "उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति, यथा-गवयदर्शनं गोस्मरणस्य" (शाङ्करभाष्यम् पृ.१०७) पूर्वानुभूते स्मर्यमाणेऽर्थे दृश्यमानार्थसादृश्य-ज्ञानमुपमानमिति । यथा - 'या नगरे अस्माभिः दृष्टा गौः सा गवयेनानेन सदृशीति सादृश्यज्ञानम् दृश्यमानगवयमृगनिरूपित-सादृश्यप्रकारकगोविशेष्यकप्रमा उपमितिः इति भावः तत्करणं गवयमृगदर्शनमुपमानम् वाक्यार्थस्मरणमवान्तरव्यापारः मानमेयोदये नारायणेनापि एवमेव उक्तम् । किन्तु गवये गोसादृश्यप्रत्यक्षानन्तरं स्मर्यमाणे गवि गवयसादृश्यमुपमानात् ।

**(ख) प्रभाकरसिद्धान्तः -**

शाबरभाष्योक्तोपमानलक्षणे (बृहती, पृ. १०७) गोस्मरणस्य इति भाष्यमनुअनुचितं मन्यमानेन प्रभाकरेणानुभूतगोः पुरुषस्येति बृहत्यामर्थो वर्णितः । एवम् च दृश्यमानसादृश्यजन्यं

गवयसादृश्यज्ञानमुपमानमिति । उपमानस्य लक्षणं सफलीभूतमिति । उक्तमस्ति यत् मीमांसकधुरन्धरैः शालिकानाथेन ऋजुविमलापञ्चिकायाम् -

सादृश्यात् दृश्यमानात् यत् प्रतियोगिनि जायते ।

सादृश्यविषयं ज्ञानमुपमानं तदुच्यत इति । ” (बृहती १०९)

एवं विधमुमितिज्ञानं नानुमानिकम्, अनपेक्षितपक्षादिधर्मकस्य भावात् । न च गवयगतं सारूप्यं तत्र लिङ्गम्, अपक्षधर्मत्वात् । नापि गोगतम्, असिद्धत्वात्, प्रतिज्ञातार्थैकदेशत्वाच्च । विषाणाद्यवयवजातमपि न गोगतं लिङ्गम्, इदानीं वनस्थस्य तद्ग्रहणाभावात्, अगृहीतस्य च लिङ्गत्वानुपपत्तेः । गवयगतमपि तदलिङ्गमेव, पूर्ववदपक्षधर्मत्वात् । तस्मात् गवयसादृश्यविशेषित-नगरगतपरोक्षगोपिण्डज्ञानं काननवर्तिनः प्रमातुः प्रमाणान्तरं भवतीति अभ्युपगन्तव्यमिति । ( श्लोकवार्तिकम्) मीमांसकमतस्य प्रतिपादानं न्यायदर्शनात् पृथगैव उपरि प्रतिपादितम् । इदानीं न्यायदर्शनानासारेणात्र पुनश्च एतदुक्तं भवति मीमासंकानां मतमादाय - तदिदं मीमासकमतमनुपपन्नम्, एवंविधप्रतीत्यभावात् । तथा हि अश्रुतातिदेशको नागरकः कानने परिभ्रमन् अदृष्टपूर्वं गोसदृशं प्राणिनमुपलभमान एवं बुध्यते, ब्रवीति च अहो गवा सदृश एष कश्चन प्राणी इति । न त्वनेन सदृशो गौरिति ज्ञानमभिधानं वा कस्यचिद् भवति । अतः प्रमितेरेवाभावात् किं प्रमाणचिन्तया ?

**ग) भवतु वैषा बुद्धिः -**

अनेन गवयेन सदृशो गौः इति । तथापि तस्य स्मृतिरूपत्वात् न प्रमाणम् । ननु गोपिण्डमात्रे सत्यं स्मृतिरेवैषा, किन्तु सम्प्रति अवगतगवयसादृश्यविशिष्टत्वं तु तस्य पूर्वमनुपलब्धमधुनैव गम्यते - इति नैषा स्मृतिरिति चेन्न, गवयसादृश्यस्यापि तत्र पूर्वं ग्रहणात् ।

‘ननु अनवगतगवयेन गवि गवयसादृश्यमवगतमिति चित्रम्, इति चेन्न, व्यक्तितिरस्कृतस्य ग्रहणात् ’ (न्यायमञ्जरी, उपमानप्रमाणप्रकरणम्) । ननु इदमपि चित्रतरम्, गृहीतं च व्यक्तितिरस्कृतं चेति । व्यक्तिर्हि ग्रहणमेव, तत्तिरस्कारे च नास्त्येव ग्रहणमुच्यते नैतदिति चित्रतरम् । तथा हि-

वने गवयमालोक्य नागरिको न करेणुमनुस्मरति, न करभम्, न वा तुरङ्गम्, अपि तु विशिष्टमेव पिण्डम् । न च निर्निबन्धनमेवेदं विशिष्टविषयस्मरणमुत्पत्तुम् अर्हति । तस्मात् यत्रैव परिदृश्यमानपिण्डसादृश्यं पूर्वमवगतं, स एव पिण्डेऽस्मिन् दृश्यमाने स्मरणपथमवतरति, नेतर इति । सादृश्यग्रहणमसंवेद्यमानमपि अभ्यस्तविषयाविनाभावस्मृतिवत् बलात् परिकल्प्यते । पूर्वं च गवयग्रहणाद्विना गवयसदृशीयं गौरिति ग्रामीणस्यानुभवो न भवतीति व्यक्तितिरस्कृतं तत्सादृश्यग्रहणमुच्यते इति न किञ्चिच्चित्रम् । तस्मात् स्मृतिरेवेयम् । तथा हि - प्रतीतिः अनेन सदृशो गौर्मया नगरे दृष्टः इति । न तु अद्यैतत्सदृशो गौर्दृश्यते इति बुद्धिः । ननु प्रतियोगिग्रहणाद्विना कथं ग्राम्यस्य सादृश्यग्रहणम् ? अत्र भवतैवात्मनः प्रतिकूलमभिहितम् –

सामान्यवच्च सादृश्यं एकैकत्र समाप्यते ।

प्रतियोगिन्यदृष्टेऽपि तस्मात्तदुपलभ्यते ॥

स च भूयोऽवयवसामान्ययोगोऽगृहीतगवयवेनापि नागरकेण गृहीतुं शक्यते । अथ तदा तद्ग्रहणेऽपि सति न तस्य सदृशप्रत्ययः - न तर्हि भूयोऽवयवसामान्ययोगः सादृश्यम्, किन्तु सादृश्यप्रत्ययहेतुः

सादृश्यम् । यथोक्तम् - सादृश्यं सदृशप्रत्ययहेतुत्वमेव । भूयोऽवयवसामान्ययोगे च तल्लक्षणे चित्रादावव्याप्तिः । अतिव्याप्तिश्च प्राण्यन्तरेषु विसदृशेष्वपि तदवयवसामान्यानां खुरादीनां भावाद् भूयस्त्वं तु कियत्तेषामिति न विद्मः । यावता सादृश्यप्रत्ययोत्पत्तिरिति चेत्, तर्हि सदृशप्रत्ययहेतुत्वमेव सादृश्यमस्त्विति युक्तम् ।तस्माद् गवयदर्शनात् पूर्वमपि गव्यभिव्यक्तसादृश्यग्रहणोपपत्तेः स्मृतिरेवेयम् ।

**घ) अथ मतं नैयायिकानाम् -**

अतिदेशवाक्यवेलायां सोपप्लवा संज्ञासंज्ञिसम्बन्धबुद्धिः उपमानात् निरूपप्लवी भवति, एवमियमपि - योऽसौ पूर्वं व्यक्तितिरस्कृता गवि गवयसादृश्यबुद्धिरभूत्, सेदानीं उपमानाद् व्यक्तीभवति इति ।

नैतदस्ति - गवयग्राहिणा प्रत्यक्षेणैव तत्स्पष्टतासिद्धेः यथा भवद्भिर्नैयायिका उक्ताः - अथ त्वधिकता काचित् प्रत्यक्षादेव साभवद् इति । तथा नैयायिका अपि युष्मान् मीमांसकान् वक्ष्यन्ति ।

ननु अत एवेदमुपमानं प्रमाणान्तरमुच्यते, प्रत्यक्षस्य सन्निहितगवयस्वरूपमात्रनिष्ठत्वात् । परोक्षे च गवि गवयसादृश्यप्रत्ययस्य विस्पष्टस्यान्यतोऽसिद्धेरिति ।

उक्तमत्र - स्मृतिरेवेयम्, तथावभासनात् । अनधिगतार्थग्राहि च प्रमाणमुपगच्छन्ति भवन्तः । भवतु वा स्मृतिविलक्षणेयं प्रतीतिः, तथापि अनुमानजन्यत्वात् न प्रमाणान्तरमाविशति । स्मर्यमाणो गौः धर्मी, एतत्सदृश इति साध्यो धर्मः, एतदवयवसामान्ययोगित्वाद् इति हेतुः, सन्निहितद्वितीयगवयपिण्डवद् इति दृष्टान्तः । तदसन्निधाने सामान्येन व्याप्तिः प्रदर्शनीया - यत्र यदवयवसामान्ययोगित्वं तत्र तत्सादृश्यम् । सामान्ययोगोऽन्यः, अन्यच्च सादृश्यम् इत्युक्तत्वात् न प्रतिज्ञा वैकदेशो हेतुः । अव्युत्पन्नस्य नारिकेलद्वीपवासिनः, बालस्य न तत्प्रत्ययानुपादात् न व्याप्तिनैरपेक्ष्येण सा प्रतीतिरिति वक्तव्यम् । तस्माद् इत्थमनुमानजन्यत्वात् स्मृतित्वाद् वा पूर्वोक्ताद् असम्भवादेव वा नेयमवगतिः उपमानकार्येति सिद्धम् ।

कश्चास्य भवदुपमानस्य स्वतन्त्रोपयोगः ? एवं हि आहुर्भवन्तः –

अपरीक्षामिषेणापि लक्षणानि वदन्नयम् ।
न स्वतन्त्रोपयोगित्वनिरपेक्षाणि जल्पति । ( श्लोकवार्त्तिकम्, शब्दप्रमाणमप्रकरणम्)

ननु उक्त एवोपयोगः सौर्ये चरौ द्रव्यदेवतासारूप्यादाग्नेयविध्यन्तलाभः । आग्नेयोऽष्टकपालः इत्युपदिष्ट-दृष्टादृष्टेतिकर्तव्यताकलापतया निराकाङ्क्षो विधिः । सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इत्यत्र प्रधानमात्रोपदेशाद् विध्यादिरस्ति, न तु विध्यन्तः - इतिकर्तव्यताभिधानम् । न चानितिकर्तव्यताकं कर्म प्रयोगयोग्यम् । अतः किमिदमितिकर्तव्यताजातमिह गृह्यतामित्यपेक्षायां चरूपुरोडाशयोः ब्राह्माद्यौषधसाध्यत्वेन द्रव्यसादृश्यात् सूर्याग्न्योश्च तेजस्वितया देवतयोः सारूप्याद् आग्नेयेतिकर्तव्यता सौर्ये क्रियते इत्युपमानाद् गम्यते । अपि च क्वचिच्चोदितद्रव्यादावलभ्यमाने प्रतिनिध्युपादानेन कर्मसमापनात् प्रतिनिधिमात्रोपादाने प्राप्ते व्रीहिसदृश-नीवारोपादानमुपमानात् प्रतीयत इति ।

**ङ) तदेतदसमञ्जसम् -**

प्रसिद्धेन अप्रसिद्धस्य सादृश्यम् अवगम्यते इत्येष भवद्भिरुत्सृष्टपन्थाः । विपर्ययस्त्वाश्रितः । यदपि अदृष्टेन नूतनेन अप्रसिद्धेन गवयेन वाक्यसिद्धस्य गोः सादृश्यमुपमानात् प्रतीयत इति, तदिहापि

निर्ज्ञातेतिकर्तव्यताकेन गोवत् प्रसिद्धेन आग्नेयेन सौर्यस्य गवयवद् अप्रसिद्धस्य सादृश्यमवगम्यते । न तु गवयेन गोः - सौर्येण आग्नेयस्य वा । तदिह यस्य विध्यन्तार्थिना, न तत्रोपमानात् सादृश्यावगमः, यत्र वा तदवगमः, न तयेतिकर्तव्यतार्थित्वम् । ननु सौर्ये विध्यन्तार्थिनि प्रतीयमाने द्रव्यदेवतासारूप्यादेराग्नेयः स्मरणपद्यमवतरतीति । तत एवासौ विध्यन्तमधिगच्छतीति - एवमपि स्मरणमात्रात् सिद्धेऽर्थे किमुपमानेन ? आग्नेयस्मरणादेव तदितिकर्तव्यता सौर्ये उपादास्यते । स्मृतिविशेष एव विषयाधिक्याद् उपमानमुच्यते इति चेत् प्रतिविहितमेतद् इत्यलं प्रसङ्गेन । इत्थमस्माभिर्नैयायिकैरुक्तं यदुपमानप्रमाणस्वरूपम् उपमितेश्च स्वरूपं तदेव समीचीनम् ।

**९.वैशेषिकदर्शनदृष्ट्योपमानप्रमाणम् –**

वैशेषिकदर्शने उपमानप्रमाणं पृथकतया नैव स्वीक्रियते । तस्य वैशेषिकाः महर्षिकणादस्य 'अस्येदमिति बुद्ध्यपेक्षितत्वादिति' सूत्रानुसारेण उपमानादीनामनुमानप्रमाणे एवान्तर्भावं कुर्वन्ति । तस्य विवरणं तत्र उपस्कारकारेण स्वकीये वैशेषिकोपस्कारनामके ग्रन्थे प्रदत्तमिति दृश्यते । - अस्येदमिति बुध्यपेक्षितत्वाद् उपमानार्थापत्तिसम्भवाभावानामिति शेषः । अस्य व्यापकस्य इदं व्याप्यमित्याकारा या बुद्धिः सा जनकत्वेन अपेक्षिता येषां ते तदपेक्षिताः तस्य भावः तदपेक्षितत्वं तस्मादित्यर्थः । आहिताग्निपाठात् क्तान्तेन बहुव्रीहिः, तारकादिपाठादितज्वा । (वैशेषिकसूत्रोपस्कारः) तत्रोपमानं तावद् अनुमानमेव शब्दद्वारा । तथा हि - गोसदृशो गवय इति वाक्यद्वारा गवयः कीदृशः इति जिज्ञासा जायते । तत्र गवयशब्दवाच्यः गोसदृशो वर्तते इति इति सामानाधिकरण्यबलात् अतिदेशवाक्यश्रवणानन्तरमेव परिच्छिनत्ति । वनं गतस्तु तादृशं पिण्डमुपलभ्य अयमसौ गवयशब्दवाच्य इति प्रतिसन्धानं करोति ।

यदा अतिदेशवाक्यश्रवणं क्रियते तदा गवयत्वस्य प्रवृत्तिनिमित्तं न ज्ञायते । तदानीं कथं संज्ञापरिच्छेद भवति ? तत्र जिज्ञासायां सत्यां लक्षणया तत्प्रतीतिः सम्भतीति मन्तव्यम् । गोसदृशो गवय इति वाक्ये अन्वयस्य उपपत्तिर्भवितुं नशक्नोति, तस्माद् कारणाद् तस्मिन् स्थले कथं लक्षणेति चेत् तात्पर्यानुपपत्तेः सत्त्वात् । न हि व्युत्पत्सुं प्रति गोसादृश्यस्य सखण्डस्य प्रवृत्तिनिमित्तत्वेन उपदर्शनं अनुचितम्, तस्माद् अखण्डजातिविशेषे तात्पर्यमस्येति लक्षणासम्भवात् ।

अथवा गवयशब्दो गवयवाचकः असति वृत्यन्तरे शिष्टैः तत्र प्रयुज्यमानत्वात्, असति वृत्यन्तरे यः शब्दो यत्र शिष्टैः प्रयुज्यते स तस्य वाचकः, यथा गोशब्दो गोः इत्यनुमानादेव गवयसंज्ञां परिच्छिनत्ति । तर्कश्च यस्त्वया नैयायिकेन उपमानसहकारी उच्यते, स वरमनुमाने क्लृप्तप्रमाणभावेऽस्तु, किं कल्पनीयप्रमाणभावेनोपमानेनेति ।

एतदेव प्रकारान्तरेण मुक्तावलीकारेण विश्वनाथपञ्चाननभट्टाचार्येण च स्वग्रन्थे उक्तम् - गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्यन्तरे वृद्धैः तत्र प्रयुज्यमानत्वात् । अत्र गवयपदं तद्व्यक्तित्वेन पक्षः । गवयत्वप्रवृत्तिनिमित्तकमिति साध्यम्, गवयत्वावच्छिन्नपिण्डनिष्ठशक्ति-निरूपकमित्यर्थः । असति वृत्त्यन्तरे वृद्धैः तत्र प्रयुज्यमानत्वादिति हेतुः । (न्यायसिद्धान्तमुक्तावली, उपमानखण्डः)

शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यगवयत्वावच्छिन्नविषयकशाब्दबोधनिरूपितोपस्थितिनिष्ठजनकता निरूपिताजन्यतासम्बन्धावच्छिन्नावच्छेदकतानिरूपितविषयित्वसम्बधावच्छिन्नावच्छेदकतावद्वृत्तिमत्त्वा दति हेतुफलितार्थो बोध्यः । तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानतदुपस्थितेः हेतुत्वस्य

सर्वानुमतसिद्धत्वाभिप्रायात् । गवयकर्दमस्य प्रक्षालनाभिप्रायेण प्रयुक्तं गवयं प्रक्षालय इति । तत्र गवयकर्दमे लाक्षणिकगवयपदे व्यभिचारवारणाय असति वृत्यन्तरे इति लक्षणाग्रहाजन्यत्वार्थकम् ।
गवयपदस्य बहुशाखशृङ्गमृगादौ शक्तिभ्रमवत्पुरुषेण प्रयुक्तस्य हेतुमत्त्वेऽपि साध्याभाववत्त्वाद् व्यभिचारः, तद्वारणाय वृद्धैरिति आप्तैरित्यर्थः, पदमिदं शक्तिभ्रमजन्यत्वार्थकम् । गवयपूतलिकादौ गवयचित्रे वा प्रयुक्ते गवयपदे व्यभिचारवारणाय तत्रेति पदमिदं गवयत्वजात्यवच्छिन्नप्रसिद्धपशुपिण्डमुद्दिश्य इत्यर्थकम् । एतादृशानुमाने सामान्यमुखी व्याप्तिस्तु - असति च वृत्त्यन्तरे वृद्धैः यत्र यत् प्रयुज्यते तत् पदं तत्रार्थे प्रवृत्तिनिमित्तकं भवति, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् । गोपदे तु वृद्धव्यवहारेण शक्तिग्रहनिर्णयेन दृष्टान्तत्वोपपत्तिः, नातो गोपदे गोत्वावच्छिन्नशक्तत्वानुमानात् प्राक् साध्यनिर्णयाभावात् कथं दृष्टान्तत्वमिति शङ्कावकाशः ।
इदमपि बोध्यमत्र - गवयप्रत्यक्षानन्तरं गवयत्वविशिष्टं गवयपदशक्यम्, गवयपदनिरूपित-लक्षणाशून्यत्वे सति गवयपदनिरूपिताभ्रान्तसमवेतवृत्तिज्ञानजन्योपस्थितिविशेष्यत्वात् ।
यद्धर्मावच्छिन्नं यत्पदनिरूपितलक्षणाशून्यत्वे सति यत्पदनिरुपिताभ्रान्तसमवेतवृत्तिज्ञानजन्योपस्थिति-विशेष्यं भवति तद्धर्मावच्छिन्नं तत्पदशक्यम्, यथा - गोत्वावच्छिन्नं गोपदशक्यमित्यनुमानात् गवयत्वावच्छिन्ने गवयपदशक्यतानुमिति इति ।

प्रकारान्तरेणापि उपमानप्रमाणस्यानुमानेऽन्तर्भावं कर्तुं शक्यते । यथा - गवयपदं पक्षः, सप्रवृत्तिनिमित्तकं साध्यम्, किञ्चिदर्थनिरूपितशक्तिमदित्यर्थः । साधुपदत्वादिति हेतुः किञ्चिद्विषयक-बोधजनकत्वप्रकारता-निरूपितेश्वरेच्छीय–विशेष्यतावत्पदत्वादित्यर्थः । एतादृशानुमानेन हेतोः पक्षधर्मताबलात् गवयत्वप्रवृत्तिनिमित्तकत्वं गवयपदोद्देश्यकानुमितौ भासते इति भावः । (वैशेषिक-सूत्रोपस्कारः, ९-२-५) । तथा च सर्वत्र - उपमानजन्यबोधस्य अनुमितित्त्वेनैव निर्वाहे उपमितिकरण-तयोपमानस्य पृथक् प्रमाणकल्पनमनुचितमिति वैशेषिकाणामाशयः ।

## १० निष्कर्षः

वस्तुतः सर्वेषां दर्शनानां प्रवृत्तिः दुःखनिवृत्यर्थमेव अस्ति । अतः एव मुक्तिप्राप्तिः सर्वेषां पूर्वीयदर्शनानां सर्वस्वीकृतसिद्धान्तः । सर्वेपि जन्तवः जन्ममरणचक्रे अनादिकालात् परिभ्रमन्तः सन्ति । एतस्माद् चक्रात् बहिरागमनाय च तत्र दर्शनशास्त्रे नैका उपायाः प्रदर्शिताः । दर्शनशास्त्रे प्रदर्शिता उपायविधय एव साधनत्वेन सुपरिचिताः तथा व्यवहृताः इति । विषयस्य यथार्थबोधं विना न कस्यापि जीवनं साफल्यमभूत् । अतः प्रथमं यथार्थज्ञानं वस्तूनां कर्तव्यम् । यथार्थज्ञानं विना हानोपादेयादिव्यवहारो नभवति । तदर्थं यथार्थज्ञानं वस्तूनां प्रथमं कर्तव्यम् । प्रमाणद्वारा विषयस्य यथाथज्ञानं भवितु शक्नोति । अतः दर्शनशास्त्रे प्रमाणानि साधनानि भवन्ति । येन साहाय्येन विषयस्य वास्तविकं ज्ञानं कर्ता कर्तुं शक्नोतीति । तानि साधनत्वेन परिचितानि प्रमाणानि च दर्शने शास्त्रे सख्यया च भिन्नान्वेवोपलभ्यन्ते । प्रत्यक्षानुमानोपमानशब्दा इति चत्वारि प्रमाणानि न्यायशास्त्रे । एवं सांख्यशास्त्रे च प्रत्यक्षानुमानशाब्दा इति त्रिणि प्रमाणानि, तथैव वैशेषिकवबौद्धाश्च प्रत्यक्षानुमानं प्रमाणद्वयमेव संगृहीतमस्ति । वेदान्तामीमांसादिदर्शनान्तरेषु शास्त्रेषु पञ्च षड् वा प्रामाानि स्वीकृतानि । वस्तुतः तत्र स्वसिद्धान्तानुरोधेन यावद्भिः प्रमाणैः विषयाः गृह्यन्ते तावद्भिरेव प्रमाणैः विषयस्य यथार्थावबोधः क्रियत इति । न्यायदर्शने चत्वारि प्रमाणानि स्वीकृतानि । तत्र च प्रत्यक्षप्रमाणद्वारा

प्रत्यक्षज्ञानं भवति, तथा च अनुमानप्रमाणद्वारा अनुमितिज्ञानं भवति । एवं च उपमानप्रमाणद्वारा उपमितिज्ञानं भवति, शब्दप्रमाणद्वारा शाब्दबोधो भवतीति । अत्र प्रत्यक्षपूर्वमेव सर्वेषां प्रमाणानां प्राणसञ्चलनं च भवति । अत्र च विशेषचर्चा उपमानप्रमाणस्य च वर्तते । कतिपयदर्शनशास्त्रेषूपमानप्रमाणं नैव स्वीकृतम् । कुत्रचिच्च स्वीकृतेषु प्रमाणेष्वेवान्तर्भावः कृतो दृश्यते परन्तूपमानप्रमाणं पृथग्गेव परिगणनं कर्तव्यमेव । तस्यान्तभार्वमन्येषु साधनेषु नैव कर्तव्यम् । यतो हि उपमानप्रमाणस्य सामगी न कुत्रापि अन्तर्भवितुं शक्नुवन्ति । तस्माद् कारणाद् उपमानप्रमाणं पृथगेव निरूपणं कर्तव्यमिति ।

## सन्दर्भ सामग्री सूची


गौतमः (सन् १९६८) *वैशेषिकसूत्रम्, वैशेषिकसूत्रोपस्कारः* (टीकासहितम्), वाराणसी : चौखम्बा अमरभारती प्रकाशनम् ।

भट्टः, अन्नम् (सन् १९९०), *तर्कसंग्रहः,* व्याख्याचतुष्टयोपेतः (व्याख्यातारो गोवर्धनसुधी–चन्द्रजसिंहः), दिल्ली : चौखम्बा अमरभारती प्रकशनम् ।

भट्ट, कुमारिलः, (सन् २००२), *श्लोकवार्तिकम्,* (काशिकाख्यया टीकया समेतम्, सम्पादकः साम्बशिवशास्त्री ), वाराणसी : चौखम्बा विद्याभवनम् ।

भट्टः, जयन्तः (सन् १९९७), *न्यायमञ्जरी* (ग्रन्थीभङ्गव्याख्यापरिभूषिता), वाराणसी : : सम्पूर्णानन्द संस्कृत विश्वविद्यालयप्रकाशनम् ।

भट्टः, नारायणः (सन् १९९६), *मानमेयोदयः,* (द्वितीयसंस्करणम्), वाराणसी : चौखम्बा विद्याभवनम्

भासर्वज्ञः, (सन् १९६८), *न्यायभूषणम्,* वाराणसी : षड्दर्शनप्रकाशन प्रतिष्ठानम् ।

भासर्वज्ञः, (सन् १९६८), *न्यायसारः,* (संम्पा.स्वामी योगीन्द्रानन्दः), वाराणसी : षड्दर्शनप्रकाशन-प्रतिष्ठानम् ।

मिश्रः केशवः, (सन् २००४), *तर्कभाषा,* (हिन्दीव्याख्योपेता, व्याख्याकारः गजानन शास्त्री ‘मुसलगाँवकर’), वाराणसी : चौखम्बासुरभारती ।

मिश्रः, नारायणः, (सन् १९६८) *वैशेषिकदर्शन एक परिचय,* वाराणसी : चौखम्बाविद्याभवनम् ।

मिश्रः, मण्डनः (सन् १९८३), *मीमांसादर्शनम्,* दिल्ली : श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृत-विद्यापीठम् ।

विश्वनाथः पञ्चानन’ (सन् २००३), *न्यायसिद्धान्तमुक्तावली,* किरणावलीसहिता, व्याख्याकारः कृष्णवल्लभाचार्यः), वाराणसी : चौखम्बासंस्कृतसंस्थानम् ।